श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकृष्ण प्रणीतं

# ॥ श्री लक्ष्मीनारायणाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनारायणाष्टकम् ॥

## ध्यानम्

चक्रं विद्यावरघटगदादर्पणं पद्मयुग्मं
दोर्भिर्बिभ्रत्सुरुचिरतनुं मेघविद्युन्निभाभम्।
गाढोत्कण्ठं विवशमनिशं पुण्डरीकाक्षलक्ष्म्योः
एकीभूतं वपुरवतु वः पीतकौशेयकान्तम्॥ 1 ॥

शङ्खचक्रगदापद्मकुम्भादर्शाब्जपुस्तकम्।
बिभ्रतं मेघचपलवर्णं लक्ष्मीहरिं भजे॥ 2 ॥

विद्युत्प्रभाश्लिष्टघनोपमानौ
शुद्धाशये बिम्बितसुप्रकाशौ।
चित्ते चिदाभौ कलयामि लक्ष्मी -
नारायणौ सत्त्वगुणप्रधानौ॥ 3 ॥

## स्तोत्रम्

लोकोद्भवस्थे मलयेश्वराभ्यां
शोकोरुदीनस्थितिनाशकाभ्याम्।
नित्यं युवाभ्यां नतिरस्तु लक्ष्मी -
नारायणाभ्यां जगतः पितृभ्याम्॥ 4 ॥

सम्पत्सुखानन्दविधायकाभ्यां
भक्तावनानारतदीक्षिताभ्याम्।

नित्यं युवाभ्यां नतिरस्तु लक्ष्मी -
नारायणाभ्यां जगतः पितृभ्याम् ॥ **5** ॥

दृष्ट्वोपकारे गुरुतां च पञ्च -
विंशावतारान् सरसं दधद्भ्याम् ।
नित्यं युवाभ्यां नतिरस्तु लक्ष्मी -
नारायणाभ्यां जगतः पितृभ्याम् ॥ **6** ॥

क्षीराम्बुराश्यादि विराट्भवाभ्यां
नारं सदा पालयितुं पराभ्याम् ।
नित्यं युवाभ्यां नतिरस्तु लक्ष्मी -
नारायणाभ्यां जगतः पितृभ्याम् ॥ **7** ॥

दारिद्र्यदुःखस्थितिदारकाभ्याम्
अद्यैव दूरीकृतदुर्गतिभ्याम् ।
नित्यं युवाभ्यां नतिरस्तु लक्ष्मी -
नारायणाभ्यां जगतः पितृभ्याम् ॥ **8** ॥

भक्तव्रजाघौघविदारकाभ्यां
स्वीयाशयोद्धूतरजस्तमोभ्याम् ।
नित्यं युवाभ्यां नतिरस्तु लक्ष्मी -
नारायणाभ्यां जगतः पितृभ्याम् ॥ **9** ॥

रक्तोत्पलाभाभवपुर्धराभ्यां
पद्मारिशङ्खाब्जगदाधराभ्याम् ।
नित्यं युवाभ्यां नतिरस्तु लक्ष्मी -
नारायणाभ्यां जगतः पितृभ्याम् ॥ **10** ॥

अङ्घ्रिद्वयाभ्यर्चककल्पकाभ्यां
मोक्षप्रदप्राक्तनदम्पतीभ्याम्।
नित्यं युवाभ्यां नतिरस्तु लक्ष्मी -
नारायणाभ्यां जगतः पितृभ्याम्॥ **11** ॥

इदं तु यः पठेत् स्तोत्रं लक्ष्मीनारायणाष्टकम्।
ऐहिकामुष्मिकसुखं भुक्त्वा स लभतेऽमृतम्॥ **12** ॥

॥ इति श्री लक्ष्मीनारायणाष्टकं समाप्तम्॥